मेदि०। ५घातके शब्दच०। ६प्रसारण्यां स्त्री शब्दर०टाप्।

**शरणागत** त्रि० शरणमागतः आ+गम–क्त। शरणापन्ने।

**शरणापन्न** त्रि० शरणमापन्नः आ+पद क्त। शरणमागते।

**शरणार्थिन्** त्रि० शरणमर्थयते अर्थ–णिनि। शरणकामे।

**श(स)रणि(णी)** स्त्री शृ(सृ)–अनि वा ङीप्। १पथि, ङीवन्तस्तु २प्रसारण्यां शब्दर०। ३जयन्त्याञ्च स्त्री शब्दर०। ४पृथ्व्याम् अजयः।

**शरण्ड** पु० शृ–अण्डच्। १खगे कामुके शब्दरत्ना०। २धूर्त्ते ३शरटे ४भूषणभेदे मेदि०। ५चतुष्पादि संक्षिप्तसा०।

**शरण्य** त्रि० शरणाय साधुः यत्। १शरणागतत्राणकरण-योग्ये २दुर्गायां स्त्री।

"विपाग्निभयघोरेषु शरणं स्मरणात् यतः। शरण्या तेन सा देवी पुराणे परिपठ्यते" देवीपु०।

**शरण्यु** पु० शृ–अन्यु। १मेघे २वाते च विश्वः। [शब्दर०

**शरत्कामिन्** पु० शरदि कामयते कम–णिनि। कुक्कुरे

**शरत्पद्म** न० शरदिव शुभ्रं पद्मम्। श्वेतपद्मे राजनि०।

**शरत्पर्वन्** न० ७त०। कोजागरपूर्णिमानिमित्तोत्सवे जटा०।

**शरद्** स्त्री शृ–अदि। १वत्सरे, २आश्विनकार्त्तिकमासात्मके ऋतौ च अमरः। तद्दारिगुणा भावप्र० उक्ता यथा "वर्षासु नाभसं वारि सेवेतौद्भिदमेव वा। सर्वं शरदि हेमन्ते तड़ागं सारसन्तु वा"। शारदं चानभिष्यन्दि लघु तत् परिकीर्त्तितम्। हैमन्तिकजलं स्निग्धं बल्यं वृष्यं हितं गुरु" राजव०। तत्रोत्तरवायुसेवनं हितं यथा "वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः। उत्तरः शारदे काले पूर्वो हेमन्तशैशिरे" राजनि०। ऋतुशब्दे दृ० दृश्यम्। "शरदृतुस्च वैद्यकमते भाद्राश्विनमासात्मकः। तत्र वर्णनीयानि चन्द्रपटुता जलमुक्तता अगस्त्यः हंसः वृषः" कविकल्प०।

**शरधि** पु० शरा धीयन्तेऽत्र धा–आधारे कि। तूणे हेमच०

**शरपुङ्खा** स्त्री शरस्येव पुङ्खो यस्याः। नीलीवृक्षाकृतौ काण्ड-पुङ्खावृक्षे "शरपुङ्खा यकृत्प्लीहगुल्मव्रणविषापहा। तिक्ता कषाया कासास्रज्वरश्वासहरी लघुः" भावप्र०।

**शरभ** पु० शृ–अभच्। "अष्टापादूर्द्ध्वनयन ऊर्द्ध्वपादचतुष्टयः" इत्युक्तलक्षणे १मृगभेदे अमरः। २करभे, ३वानरभेदे अमरः। ३उष्ट्रे च जटा०। ४शिशुपालपुत्रभेदे भा० आश्व० ८३ अ०। ५दानवभेदे भा० आ० ६५ अ०। "अष्टपादूर्द्ध्वनयनः शरभो वनगोचरः। तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनम्। तं मुनिः शरभं चक्रे बलोत्कटमरिन्दमम्। ततः स शरभो वन्यो मुनेः शरभमप्यतः। दृष्ट्वा बलिनमत्युग्रं द्रुतं सम्प्राद्रवद्वनात्। स एवं शरभस्थाने संन्यस्तो मुनिना तदा। मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान्। ततः शरभसन्त्रस्ताः सर्वे मृगगणास्तदा। दिशः सम्प्राद्रवन् राजन्! भयाज्जीवितकाङ्क्षिणः। शरभोऽप्यतिसंहृष्टो नित्यं प्राणिवधे रतः। फलमूलाशनं कर्त्तुं नैच्छत् स पिशिताशनः। ततो रुधिरतर्षेण बलिना शरभोऽन्वितः। इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः। ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा। विज्ञाय स महाप्राज्ञो मुनिःश्वानं तमुक्तवान्। श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः। व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमागतः। सिंहस्त्वं बलमापन्नो भूयः शरभतां गतः। मया स्नेहपरीतेन विसृष्टो नकुलान्वयः। यस्मादेवमपापं मां पाप! हिंसितुमिच्छसि। तस्मात् श्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि। ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोऽबुधः। ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान्" भा० शा० ११७अ०।

**शरभू** पु० शरे शरवणे भवति भू–क्विप्। कार्त्तिकेये हेमच०

**शरमय** त्रि० शरस्य विकारः मयट्। शरजाते पदार्थे।

**श(स)रयु(यू)** स्त्री शृ–(सृ)–अयु वा ऊङ्। अयोध्यानगरीनिम्नवाहिन्यां नद्याम्। तस्यां भवः अण् नि०। शा (सा)रव तत्र भवे त्रि० अमरः।

**श(स)रल** त्रि० शृ(सृ)–अलच्। १सुगमे, २अकुटिलचित्ते (सरल) ३वृक्षभेदे च। [त्तिकेये।

**शरवणोद्भव** पु० शरवणम् उद्भवः उत्पत्तिस्थानमस्य। का-

**शरव्य** न० शरवे बाणशिक्षायै हितं शरु+यत्। लक्ष्ये, शरेण वेधनायोद्देश्ये अमरः।

**शराटि(डि)(लि)** स्त्री शरमनुलक्ष्य अटति अट–इन् पृषो० टस्य डो लो वा। (शराल) पक्षिभेदे अमरः।

**शराभ्यास** पु० ६त०। बाणमोचनशिक्षायाम् अमरः।

**शरारु** त्रि०शृ–आरु। हिंस्रे अमरः। [अण्। धनुषि जटा०

**शरारोप** पु० शराः आरोप्यन्तेऽत्र आ+रुह–णिच्।

**शराव** पु० शरं दध्यादिसारमवति अव–अण्। १मृण्मये पात्रभेदे, (शरा) अमरः। २कुडवद्वयपरिमाणे च वैद्यकम्।

**शरावती** स्त्री शराः सन्त्यस्याम् मतुप् मस्य वः पूर्वदीर्घश्च। नदीभेदे अमरः।

**शराश्रय** पु० ६त०। तूणे हेमच०।